# श्री राम कवचं

## श्री राम कवचं

अगस्तिरुवाच |
आजानुबाहुमरविंददळायताक्ष-
-माजन्मशुद्धरसहासमुखप्रसादं |
श्यामं गृहीत शरचापमुदाररूपं
रामं सराममभिराममनुस्मरामि || 1 ||

अस्य श्रीरामकवचस्य अगस्त्य ऋषिः अनुष्टुप् छंदः सीतालक्ष्मणोपेतः श्रीरामचंद्रो देवता श्रीरामचंद्रप्रसादसिद्ध्यर्थे जपे विनियोगः |

अथ ध्यानं |
नीलजीमूतसंकाशं विद्युद्वर्णांबरावृतं |
कोमलांगं विशालाक्षं युवानमतिसुंदरं || 1 ||

सीतासौमित्रिसहितं जटामुकुटधारिणं |
सासितूणधनुर्बाणपाणिं दानवमर्दनं || 2 ||

यदा चोरभये राजभये शत्रुभये तथा |
ध्यात्वा रघुपतिं क्रुद्धं कालानलसमप्रभं || 3 ||

चीरकृष्णाजिनधरं भस्मोद्धूळितविग्रहं |
आकर्णाकृष्टविशिखकोदंडभुजमंडितं || 4 ||

रणे रिपून् रावणादींस्तीक्ष्णमार्गणवृष्टिभिः |
संहरंतं महावीरमुग्रमैंद्ररथस्थितं || 5 ||

लक्ष्मणाद्यैर्महावीरैर्वृतं हनुमदादिभिः |
सुग्रीवाद्यैर्माहावीरैः शैलवृक्षकरोद्यतैः || 6 ||

वेगात्करालहुंकारैर्भुभुक्कारमहारवैः |
नदद्भिः परिवादद्भिः समरे रावणं प्रति || 7 ||

श्रीराम शत्रुसंघान्मे हन मर्दय खादय |
भूतप्रेतपिशाचादीन् श्रीरामाशु विनाशय || 8 ||

एवं ध्यात्वा जपेद्रामकवचं सिद्धिदायकं |
सुतीक्ष्ण वज्रकवचं शृणु वक्ष्याम्यनुत्तमं || 9 ||

अथ कवचं |
श्रीरामः पातु मे मूर्ध्नि पूर्वे च रघुवंशजः |
दक्षिणे मे रघुवरः पश्चिमे पातु पावनः || 10 ||

उत्तरे मे रघुपतिर्भालं दशरथात्मजः |
भ्रुवोर्दूर्वादलश्यामस्तयोर्मध्ये जनार्दनः || 11 ||

श्रोत्रं मे पातु राजेंद्रो दृशौ राजीवलोचनः |
घ्राणं मे पातु राजर्षिर्गंडौ मे जानकीपतिः || 12 ||

कर्णमूले खरध्वंसी भालं मे रघुवल्लभः |
जिह्वां मे वाक्पतिः पातु दंतपंक्ती रघूत्तमः || 13 ||

ओष्ठौ श्रीरामचंद्रो मे मुखं पातु परात्परः |
कंठं पातु जगद्वंद्यः स्कंधौ मे रावणांतकः || 14 ||

धनुर्बाणधरः पातु भुजौ मे वालिमर्दनः |
सर्वाण्यंगुलिपर्वाणि हस्तौ मे राक्षसांतकः || 15 ||

वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः |
स्तनौ सीतापतिः पातु पार्श्वं मे जगदीश्वरः || 16 ||

मध्यं मे पातु लक्ष्मीशो नाभिं मे रघुनायकः |
कौसल्येयः कटी पातु पृष्ठं दुर्गतिनाशनः || 17 ||

गुह्यं पातु हृषीकेशः सक्थिनी सत्यविक्रमः |
ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः || 18 ||

जंघे पातु जगद्व्यापी पादौ मे ताटकांतकः |
सर्वांगं पातु मे विष्णुः सर्वसंधीननामयः || 19 ||

ज्ञानेंद्रियाणि प्राणादीन् पातु मे मधुसूदनः |
पातु श्रीरामभद्रो मे शब्दादीन्विषयानपि || 20 ||

द्विपदादीनि भूतानि मत्संबंधीनि यानि च |
जामदग्न्यमहादर्पदलनः पातु तानि मे || 21 ||

सौमित्रिपूर्वजः पातु वागादीनींद्रियाणि च |
रोमांकुराण्यशेषाणि पातु सुग्रीवराज्यदः || 22 ||

वाङ्मनोबुद्ध्यहंकारैर्ज्ञानाज्ञानकृतानि च |
जन्मांतरकृतानीह पापानि विविधानि च || 23 ||

तानि सर्वाणि दग्ध्वाशु हरकोदंडखंडनः |
पातु मां सर्वतो रामः शार्ङ्गबाणधरः सदा || 24 ||

इति श्रीरामचंद्रस्य कवचं वज्रसम्मितं |
गुह्याद्गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तम || 25 ||

यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः |
स याति परमं स्थानं रामचंद्रप्रसादतः || 26 ||

महापातकयुक्तो वा गोघ्नो वा भ्रूणहा तथा |
श्रीरामचंद्रकवचपठनाच्छुद्धिमाप्नुयात् || 27 ||

ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः |
भो सुतीक्ष्ण यथा पृष्टं त्वया मम पुराः शुभं |
तथा श्रीरामकवचं मया ते विनिवेदितं || 28 ||

इति श्रीमदानंदरामायणे मनोहरकांडे सुतीक्ष्णागस्त्यसंवादे श्रीरामकवचं ||